# ॥ अभिरामसुन्दरी स्तोत्रम् ॥

**|| abhirāmasundarī stotram ||**

नमस्ते ललिते देवि श्रीमत्सिंहासनेश्वरि ।

भक्तानामिष्टदे मातरभिरामि नमोऽस्तुते ॥ १ ॥

namaste lalite devi śrīmatsiṁhāsaneśvari |

bhaktānāmiṣṭade mātarabhirāmi namo'stute || 1 ||

चन्द्रोदयं कृतवती तदङ्गेन महेश्वरि ।

आयुर्देहि जगन्मातरभिरामि नमोऽस्तुते ॥ २ ॥

candrodayaṁ kṛtavatī tadaṅgena maheśvari |

āyurdehi jaganmātarabhirāmi namo'stute || 2 ||

अमृतेशस्य श्रीकान्ते शरणागतवत्सले ।

आरोग्यं देहि मे मातरभिरामि नमोऽस्तुते ॥ ३ ॥

amṛteśasya śrīkānte śaraṇāgatavatsale |

ārogyaṁ dehi me mātarabhirāmi namo'stute || 3 ||

कल्याणि मङ्गलं देहि जगन्मङ्गलकारिणि ।

ऐश्वर्यं देहि मे मातरभिरामि नमोऽस्तुते ॥ ४ ॥

kalyāṇi maṅgalaṁ dehi jaganmaṅgalakāriṇi |

aiśvaryaṁ dehi me mātarabhirāmi namo'stute || 4 ||

चन्द्रमण्डलमध्यस्थे महात्रिपुरसुन्दरि ।

चक्रराजस्थिते मातरभिरामि नमोऽस्तुते ॥ ५ ॥

candramaṇḍalamadhyasthe mahātripurasundari |

cakrarājasthite mātarabhirāmi namo'stute || 5 ||

राजीवलोचने पूर्णे पूर्णचन्द्रनिभानने ।

सौभाग्यं देहि मे मातरभिरामि नमोऽस्तुते ॥ ६ ॥

rājīvalocane pūrṇe pūrṇacandranibhānane |

saubhāgyaṁ dehi me mātarabhirāmi namo'stute || 6 ||

गणेशस्कन्दजननि वेदरूपे धनेश्वरि ।

कीर्तिं वृद्धिं च मे देहि अभिरामि नमोऽस्तुते ॥ ७ ॥

gaṇeśaskandajanani vedarūpe dhaneśvari |

kīrtiṁ vṛddhiṁ ca me dehi abhirāmi namo'stute || 7 ||

सुवासिन्यर्चिते मातः सौमाङ्गल्यविवर्धिनि ।

माङ्गल्यं देहि मे मातरभिरामि नमोऽस्तुते ॥ ८ ॥

suvāsinyarcite mātaḥ saumāṅgalyavivardhini ।

māṅgalyaṁ dehi me mātarabhirāmi namo'stute ।। 8 ।।

मार्कण्डेयार्चिते देवि सुब्रह्मण्य सुपूजिते ।

राजराजेश्वरी त्वं हि ह्यभिरामि नमोऽस्तुते ॥ ९ ॥

mārkaṇḍeyārcite devi subrahmaṇya supūjite ।

rājarājeśvarī tvaṁ hi hyabhirāmi namo'stute ।। 9 ।।

सान्निध्यं कुरु मे नित्यं मम पूजागृहे शुभे ।

बिम्बे दीपे तथा पुष्पे हरिद्रा-कुङ्कुमे मम ॥ १० ॥

sānnidhyaṁ kuru me nityaṁ mama pūjāgṛhe śubhe ।

bimbe dīpe tathā puṣpe haridrā-kuṅkume mama ।। 10 ।।

अभिराम्या इदं स्तोत्रं यः पठेत् शक्तिसन्निधौ ।

आयुर्बलं यशो वर्चः मङ्गलं च भवेत्सुखम् ॥ ११ ॥

abhirāmyā idaṁ stotraṁ yaḥ paṭhet śaktisannidhau ।

āyurbalaṁ yaśo varcaḥ maṅgalaṁ ca bhavetsukham ।। 11 ।।

॥ इति शिवम् ॥

|| iti śivam ||

www.kamakotimandali.com